Shri Raghunath Temple MSS. Library,
JAMMU

No. १५८६

Title हेत्वाभास निरूपणम्

Author x

Extent १ Age x

Subject न्याय शास्त्रं

हेत्वाभासनिरूपणम्

१५८६

पत्रम् - १

अनुमितिपदस्य समूहालंबनानुमितिपरत्वादिति भावः ॥ ८

श्रीगणेशाय नमः ॥ न्यायनयवव्यवस्थापकहेत्वाभासान्निरूपयितुं विभागं तावन्नाम प्रतिजानीते अथेति न्यायतदवयवयोर्निरूपणानन्तरमित्यर्थः हेत्वाभासाः आभासीभूता हेतवः दुष्टहेतव इति यावत् हेतुवदाभासन्त इति
व्युत्पत्तेः ननु हेत्वाभासदोषाः नैवेत्यादिना विभागानुपपत्तेः निरूपणप्रयोजनं दर्शयति तत्त्वनिर्णयेति अबाधितकोटिनिश्चायकहेतौ दुष्टत्वज्ञाने बाधितकोटिनिश्चयो भवतीति तत्त्वनिश्चयप्रयोजकतादिति भावः स्वपक्ष
वादयोरुक्त्या जल्पवितण्डयोः फलमाह विजयेति तदुद्भावनद्वारा परोक्तहेतौ दुष्टत्वोद्भावने तस्य निग्रहादिति भावः एवं च तत्त्वनिर्णयादिलक्षणलौकिककार्यानुकूलत्वमपि निरूपणे संगतिः संभवति यथा हि स्वन्यायप्रयोगे
कृते तत्त्वनिर्णयो विजयश्च तथा परकीयहेतौ दुष्टत्वोद्भावने विनिर्णयो विजयश्चेति बोध्यम् हेत्वाभासत्वं पदोषवत्त्वं दुष्टत्वमिति दुष्टहेतुलक्षणं स्फुटमेवेति तद्दुर्वचत्वात् हेतुदोषलक्षणमाह यत्रेति तत्र निरूपणे दुष्ट
हेत्वाभासत्वम् हेतुदोषत्वमित्यन्वेति विशेषणत्वसमभ्यर्थः अनुमितीति अनुमितिप्रतिबन्धकयथार्थज्ञानविषयत्वमर्थः भवति च साध्याभाववान् पक्षः साध्याभावव्याप्यवान् पक्ष इति ज्ञानेनानुमितिप्रतिबन्धक इति
साध्याभाववत्पक्षरूपबाधस्य साध्याभावव्याप्यवत्पक्षरूपसत्प्रतिपक्षस्य हेत्वाभासत्वम् पर्वतो वह्न्यभाववान् वह्न्यभावव्याप्यवानिति भ्रमादनुमितिप्रतिबन्धान्न दोषत्वमिति तन्मा भूदित्याह यथार्थेति ।
यथार्थेत्यस्य भ्रमसाधारणत्वात् निर्वक्तव्ये नेत्यादि कयथार्थत्वमाह यथा तद्दोषतादवस्थ्यम् न च साध्याभाववद्वृत्तिसाधनादिरूपव्यभिचारादेरव्याप्तिः तस्य व्याप्तिज्ञानादिद्वारानुमितिप्रतिबन्धकत्वादिति वाच्य
म् अनुमितिपदस्य साध्यव्याप्यहेतुमान् पक्षः साध्यवांश्चेति समूहालम्बनानुमितिपरत्वादिति भावः केचित्तु दुष्टहेतोरेतल्लक्षणं नह्येवं बाधितादावव्याप्तिः तत्र हेतुज्ञानेनानुमित्यप्रतिबन्धकत्वादिति वाच्यम् यथा क
थंचित्समूहालम्बनज्ञानविषयत्वमादायैव लक्षणसमन्वयात् न चैवमनुमितिप्रतिबन्धकसमूहालम्बनज्ञानविषयत्वमादाय सद्धेतावतिप्रसंग इति वाच्यम् भ्रमभिन्नत्वरूपयथार्थत्वस्य ज्ञानविशेषणत्वेनैव तद्वारणात्
न च तथापि पक्षे वह्निमानित्यनुमितिप्रतिबन्धकभ्रमभिन्नह्रदो वह्न्यभाववान् धूमश्चेति समूहालम्बनज्ञानविषयत्वमादाय वह्निमान् धूमादित्यादावतिव्याप्तिरिति वाच्यम् अनुमितिपदस्य विशिष्यग्रहणेन साध्यव्याप्यवत्ताहेतुमान्
पक्षः तत्साध्यवांश्चेत्यनुमितिपरत्वावश्यकत्वात् तथा च तत्र तत्साध्यव्याप्यतद्धेतुमान् तत्साध्यवांश्च पक्ष इत्यनुमितिप्रतिबन्धकभ्रमभिन्नज्ञानविषयत्वाद्धेतुतावच्छेदकस्य तस्मिन् पक्षे तस्मिन् साध्ये दुष्ट इति विशिष्टलक्षणपर्य
वसानं तत्र यावत्कोऽपि दोषः धूमव्याप्यवह्निमान् धूमवांश्च पर्वत इत्यनुमितिप्रतिबन्धकव्यभिचारादिज्ञानविषयधूमस्य पर्वते पक्षे धूमे साध्ये दुष्टत्वाद्धेतौ च तद्धेतुपदं च तत्तदनुमितिप्रतिबन्धकतावच्छेदकव्याप्यवत्तादिधर्मघटितप्रामाण्यानेन तादृश
नुमितिप्रतिबन्धकसमूहालम्बननिश्चयविषयसद्धेतौ नातिप्रसंग इत्याहुः तदसत् अस्य दुष्टहेतोर्लक्षणत्वे दोषाश्रयस्य दुष्टपदार्थत्वाभावात् दुष्टपदस्य पारिभाषिकत्वापत्तेः न च पारिभाषिकत्वमिष्टमेवेति वाच्यं तथा स
ति स्वेदहेतुत्वे तत्तत्तेनसाध्ये दुष्टत्वमित्यस्यैव सम्यक्त्वे विषयान्तविशेषणवैयर्थ्यापत्तिरिति दिक् ॥ ननु व्यभिचारादिघटकसाध्यादावतिव्याप्तिः तस्यापि तादृशानुमितिप्रतिबन्धकव्यभिचारादिज्ञानविषयत्वात् सिद्धेरनु
मितिप्रतिबन्धकत्वात् साध्यवत्पक्षे ज्ञाने व्याप्तिः न च यादृशविशिष्टविषयकत्वेन तादृशानुमितिप्रतिबन्धकता ततिरिक्तवृत्तित्वादृशविशिष्टत्वे हेत्वाभासत्वं भवति च साध्याभाववद्विशिष्टपक्षसाध्याभाववद्वृत्तित्वविशिष्टसा
धनादिविषयकत्वेन तथेति वाच्यम् यथार्थेत्यस्य वैयर्थ्यप्रसंगात् भ्रमविषयविशिष्टस्याप्रसिद्धत्वादित्यरुचेर्यथार्थत्वविशेषणं परित्यज्य लक्षणान्तरमाह । यद्विषयकत्वेनेति । लिंगत्वानवच्छिन्नलिंगपदविवक्षितम्
यावादिज्ञानस्य लिंगतद्विषयत्वात् वर्णितार्थं अनुमितिपदं च साध्यव्याप्यहेतुमान् साध्यवांश्च पक्ष इत्यनुमितिपरम् ज्ञानपदं च यथार्थप्रकारेण व्यभिचारादावव्याप्तेः तथा च यद्विषयकत्वेन ज्ञानस्य धूमव्याप्य
वह्निमान् धूमवान् पर्वत इत्यनुमितिप्रतिबन्धकत्वं पर्वतत्वेन रूपेण पक्षतायां धूमत्वेन रूपेण साध्यतायां वह्नित्वेन रूपेण हेतुतायां न दोष इति प्रातिस्विकरूपेणैव लक्षणं ज्ञानमात्मासाधारणमनेकनरोपादानेऽन्य
थाव्याप्त्यापत्तेः पर्वतो वह्निमान् धूमादित्यादौ पर्वतादौ कांचनमयत्वादेरेव बाधकत्वापत्तेः तज्ज्ञानस्यापि कांचनमयः पर्वतो वह्निमानित्यनुमितिप्रतिबन्धकत्वात् न चेदमपि पक्षसाध्यादावतिव्याप्तेस्तस्यावच्छेदककोटि
प्रविष्टत्वात् न च यद्विषयतासंबन्धेनानुमितिप्रतिबन्धकतावच्छेदकतापर्याप्त्यधिकरणं तत्त्वमर्थ इति वाच्यम् तथा सति साध्याभाववत्तादेर्घटादेर्दोषत्वापत्तेः नहि साध्याभाववत्तादिविषयकनिर्णयत्वेन प्रतिबन्ध
कत्वं विशिष्टसानतिरिक्ततया केवलपक्षादिविषयकतानादेरपि प्रतिबन्धकतापत्तेः अथ यद्विशेष्यकयत्प्रकारकनिर्णयत्वेनानुमितिप्रतिबन्धकत्वं तद्विशिष्टं दोषत्वं भवति च पक्षविशेष्यकसाध्याभावप्रकारक
निर्णयत्वेन साधनविशेष्यकसाध्याभाववद्वृत्तित्वप्रकारकनिर्णयत्वादिना च प्रतिबन्धकेनेति साध्याभाववत्पक्षः साध्याभाववद्वृत्तित्वविशिष्टसाधनादिर्दोष इति चेन्न प्रतिबन्धकता हि न पक्षविशेष्यकसाध्याभावप्र
कारकनिर्णयत्वेन प्रमेयवानित्यादिज्ञानेऽप्यप्रतिबन्धकतापत्तेः न हि साध्याभावत्वरूपेण साध्याभावप्रकारकनिर्णयत्वेन पक्षे साध्यप्रतियोगिकत्वेन तादात्म्याबाधावगाहिभ्रमस्य साध्याभावत्वेन घटादावगाहित्वम् श्रुमा
साध्यानुमितिप्रतिबन्धकतापत्तेः किं तु भावत्वरूपेण यत्किंचिद्धर्मनिसाध्यप्रकारकसत्यसत्तेऽभावत्वरूपेण यत्किंचिद्धर्मप्रकारकं यत्र निर्णयत्वेन तथात्वम् न चैवमपि साध्याभाववान् पक्ष इति समूहालम्बनसाद वं॰
धिप्रतिबन्धकतापत्तिरिति वाच्यम् विलक्षणविषयताकतादृशनिर्णयत्वेन प्रतिबन्धकत्वादिति अत्राहुः यद्विषयकत्वेन ज्ञानातिरिक्तवृत्तित्वादिकमनवच्छेदकत्वं स तृतीयार्थः ननु स्वरूपसंबन्धविशेषः केवलपक्ष

साध्यादिविषयकत्वं न तथेति नातिप्रसङ्गः साध्याभाववविशिष्टपक्षादिविषयकत्वं च तत्त्वेति तेषां दोषत्वे अपक्षतापि पर्वते न विशेष्यकत्वावच्छिन्नवह्न्यभाववविशिष्टवह्न्यभावनिरूपितप्रकारताशालिवह्न्यभावप्रकारतावच्छिन्नपर्वतत्वविशिष्टपर्वत
निरूपितविशेष्यताशालिज्ञाने पर्वतो वह्निमानित्यनुमितिप्रतिबन्धकतानतिरिक्तवृत्तितया केवलवह्न्यभाववत्त्वविशिष्टवह्न्यभावे केवलपर्वतत्वविशिष्टे चातिव्याप्तिर्दुर्वारा न च केवलवह्न्यभावादिरेतद्वत्त्वं तत्राभेदे हेत्वाभासलक्षणसमन्वयेन साध्या
भाववत्पक्षादिरेव तथा तादृशानां तत्तद्दोषत्वे पर्वतो वह्निमान् ह्रदादित्यादावव्याप्तिः येन केन चित्सम्बन्धेन दोषवत्त्वपक्षवृत्तित्वादिति चेन्न यद्विषयकताशालिमान्यतादृशानुमितिप्रतिबन्धकतानतिरिक्तवृत्तित्वं तत्त्वस्यैव विवक्षित
त्वात् केवलवह्न्यभाववत्त्वविशिष्टवह्न्यभावादिविषयताशालिमान्यं च न तथा तद्विषयकत्वस्य वह्निमानित्यनुमितिकरणत्वेऽपि सत्त्वात् न चैवं विशिष्टस्यानतिरिक्ततया केवलह्रदादिविषयकत्वाने प्रमेयवत् मेयमित्यादिज्ञाने च वह्न्यभावा
दिविशिष्टह्रदादिविषयकत्वसत्त्वादसम्भव इति वाच्यम् यद्विषयकत्वपदस्य यादृशविशिष्टविषयकत्वपरत्वात् विशिष्टविषयकत्वं च विशिष्टनिरूपितविषयत्वं तस्य च विलक्षणस्य वह्न्यभाववद्ध्रदत्वादिप्रमात्मकत्वानपवर्त्तकत्वे
वलह्रदादिविषयकत्वानेऽभावात् अन्यत्र पर्वतसिद्धिविषयीभूतसाध्यवत्पक्षेऽपि नातिव्याप्तिः तद्विषयकत्वस्य सिसाधयिषाकालीनसाध्यनिश्चयेऽपि सत्त्वेनानतिरिक्तवृत्तित्वात्रह्रदात्प्रतिबन्धकतायाविवक्षणीयत्वात् यादृशविशिष्ट
विषयकत्वं चाव्याप्यवृत्तित्वग्रहानास्कन्दितानाहार्याग्रहीताप्रामाण्यकनिश्चयवृत्तित्वेन विशेषणीयम् तेन तत्संयोगादौ संयोगेऽव्याप्यवृत्तित्वग्रहास्कन्दितानाहार्यगृहीताप्रामाण्यकनिश्चयेतत्सत्त्वे विनासम्भवः न चैवं वृक्षः सं
योगीत्यादिनाशे व्याप्यवृत्तिसाध्यकसंयोगाभाववद्वृक्षत्वावच्छिन्नव्याप्तिः अव्याप्यवृत्तित्वग्रहानास्कन्दितानाहार्याग्रहीताप्रामाण्यकनिश्चयनिष्ठतादृशविषयत्वस्यानुमितिप्रतिबन्धकतानतिरिक्तवृत्तित्वादि
ति वाच्यम् तस्य बाधस्वरूपत्वेन लक्ष्यत्वात् बाधे पक्षधर्मो हेतुरनेकान्तिक इति प्रवादस्य व्याप्यवृत्तिसाध्यकबाधपरत्वात् न च तत्र सबाधितत्वे न सन्देहाभाव बाधितस्य बाधितत्वापत्तिरिति वाच्यम् हेत्वाभासविभाजकतावच्छेद
कस्य बाधितत्वस्यैव सत्त्वात् बाधितव्यवहारनियामकेऽव्यवच्छिन्नत्वाधिकरणतासंबन्धेन साध्याभाववत्त्वस्य लक्षकत्वात् न चैवं वृक्षः संयोगीत्यादिस्थलीयबाधस्य व्यभिचारस्वरूपासिद्धिसंकीर्णोद्धारस्तथा
कि सुदाहरणान्तरगवेषणायेति वाच्यम् अप्रकृतनिकास्यादनिस्पष्टतया ग्रेशकानुपेक्षणाद् नन्वेवमपि प्रमेयत्वादिविशिष्टवह्न्यभाववद्ध्रदाद्यात्मकस्य विशिष्टस्यापि दोषत्वापत्तिः तद्विषयकत्वस्याप्यनुमिति
प्रतिबन्धकतानतिरिक्तवृत्तित्वात् न च तादृशविशिष्टे तत्तद्वृत्तित्वेन यादृशविशिष्टे विशेषणीयं उक्तविशिष्टत्वेन तथा तस्य तादृशविशिष्टान्तरेण वह्न्यभाववद्ध्रदादिना घटितत्वादिति वाच्यम् प्रमेयत्वमवृत्ति प्रमेयत्वा
दित्यादावृत्तित्वाभाववद्वृत्तिप्रमेयत्वरूपे व्यभिचारेऽव्याप्तिः वृत्तिप्रमेयत्वरूपविशिष्टान्तरघटितत्वादिति चेन्न स्वानिरूपितविशिष्टविषयकत्वानवच्छेद्यत्वेन प्रतिबन्धकताविशेषणात् स्वपदेन लक्ष्यत्वेनाभिमतविशिष्टपरं
प्रमेयत्वादिविशिष्टवह्न्यभाववद्ध्रदाद्यात्मके विशिष्टे तत्त्वेन तथात्वात् तद्विषयकत्वावच्छिन्नप्रतिबन्धकतायाः स्वानिरूपिते न केवलवह्न्यभाववद्ध्रदविशेष्यकत्वेनापि वच्छिन्नत्वात् स्वानिरूपितविशिष्टविषयकत्वानवच्छेद्यत्वं च ता
दृशविशिष्टविषयकत्वानतिरिक्तवृत्तिप्रतिबन्धकतावच्छिन्नत्वं नु चैवं प्रतियोगिव्यधिकरणत्वविशिष्टसाध्याभाववत्ताग्रहदशायां व्याप्तिः तद्विषयकत्वावच्छिन्नप्रतिबन्धकतायाः स्वानिरूपिते न केवलसाध्याभाववत्ताप्रति
रोधकत्वेनावच्छिन्नत्वादिति वाच्यम् केवलवह्न्यभाववत्त्वस्यैव बाधतया तस्याबाधितत्वात् अन्ये तु कपिसंयोगी एतद्वृक्षत्वादित्यत्र बाधस्यैव सत्त्वात् न च तथा चानुमितिपदस्याव्याप्तता हानेन व्याप्तिपरतया निर्व
ह्निः पर्वतो वह्निमान् वह्निव्यभिचारादिषु धूमादित्यादौ नको विशेषाभासः स्यात् यथोक्तस्य लक्षणेन नानुमितप्रसिद्धेरिति वाच्यम् निर्वह्निः पर्वतो वह्निमान् वह्निव्यभिचारी धूमादित्यादेरप्युपपादकतयात्र हेत्वाभास
त्वविरहेऽपि तात्पर्यविरहात् पक्षप्रकृतपक्षतावच्छेदकरूपेण प्रकृतपक्षप्रकृतसाध्यतावच्छेदकरूपेण प्रकृतसाध्यवैशिष्ट्यावगाहिनी सती प्रकृतसाध्यतावच्छेदकरूपेण प्रकृतसाध्यनिरूपितव्याप्तिप्रकारेण प्रकृतहे
त्वावच्छेदकरूपेण प्रकृतसाध्यवैशिष्ट्यावगाहिनी या बुद्धिः साध्यत्र यदवगाहनात्र तद्वैशिष्ट्यावगाहित्वं ज्ञानं न तत्प्रतिबन्धकतानतिरिक्तवृत्ति यादृशविशिष्टनिरूपितविषयताशालिमान्यतादृशविशिष्टत्वं हेत्वाभासे
षत्वमिति विवक्षणीयम् इत्थं च वह्न्यभाववत्पर्वतादेरेव न ह्रदोषत्वं तद्विषयकनिश्चयमात्रस्यैव निर्वह्निः पर्वतो वह्निमानित्यादिज्ञाने न पत्र यदवगाहनेन तत्र तदवगाहिनः केवलपर्वतो वह्निमानित्यनाहार्ययाथा
र्थ्यप्रतिबन्धकत्वात् न च तादृशबुद्धेरेवाकस्य लक्ष्यप्रसिद्धिरिति वाच्यम् आहार्यरूपस्यैवसम्भवात् न चैवं पर्वतो वह्निमानित्यादौ काञ्चनमयत्वाभाववत्पर्वतादेः विशेषत्वं स्यात् तद्विषयकनिर्णयस्य पर्वतो वह्नि
मानित्यद्विस्याने